# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ७** गुणाः - ७०

विषयः – सर्वदर्शनम् **कोड – CE-1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – १२/१२/२०१६ सन्दर्भग्रन्थः – तर्कसङ्ग्रहः दीपिकासहितः (प्रत्यक्षखण्डान्ता)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः उत्तरं लिखत।** ०८

(१) दीपिकोक्तरीत्या तमसः अतिरिक्तं द्रव्यत्वं निराकुरुत।

(२) सप्तविधपदार्थविभागं समासेन विशदयत।

(३) तर्कसङ्ग्रहस्य मङ्गलाचरणं व्याख्यात।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) चतुर्विंशतिगुणानां नामानि विलिख्य रूपरसयोः गुणयोः विशेषतया वर्णनं कुरुत

(२) चतुर्विधाभावस्य सोदाहरणं वर्णनं लिखत

**प्रश्नः – ३ अधोलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) कर्म।

(२) विशेषाः।

(३) नित्यद्रव्याणि।

(४) तर्कसङ्ग्रहः इति पदस्य अर्थः।

**प्रश्नः – ४ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) केषां सुखबोधाय तर्कसङ्ग्रहः क्रियते?

(२) समवायः नित्यः उत अनित्यः ?

(३) सामान्यं कतिविधम्? किं तत्?

(४) मङ्गलस्य किं प्रयोजनम्?

(५) कति भावपदार्थाः ? के ते ?

(६) तर्कसङ्ग्रहस्य दीपिकाव्याख्यायाः कर्ता कः?

(७) लक्षणे कति दोषाः भवन्ति ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोरुत्तरं लिखत।** ०८

(१) पृथिवीलक्षणं विलिख्य तस्याः विशेषवर्णनं लिखत

(२) अपां लक्षणं विलिख्य तासांदीपिकोक्तरीत्या वर्णनं लिखत।

(३) सुवर्णस्य तैजसत्वं साधयत।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) कार्यरूपपृथिव्यादिचतुष्टयस्य उत्पत्तिविनाशक्रमं ग्रन्थोक्तदिशा विशदयत

(२) तर्कसङ्ग्रहरीत्या आत्मनः लक्षणपुरस्सरं स्वरूपंवर्णयत।

**प्रश्नः – ७ अधोलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) दिक्।

(२) मनः।

(३) स्पर्शः।

(४) द्रवत्वम्।

**प्रश्नः – ८ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) नित्यः वायुः किं रूपः?
(२) श्रोत्रग्राह्यो गुणः कः?
(३) पृथिव्याः विषयः कः?
(४) शरीररूपाः आपः कुत्र वर्तन्ते?
(५) इन्द्रियरूपं तेजः कुत्र भवति?
(६) गन्धग्राहकम् इन्द्रियं किम्?
(७) तैजसः विषयः कतिविधः? किं तत्?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्** ०८

(१) तर्कसङ्ग्रहानुसारेण यथार्थानुभवस्य सोदाहरणं वर्णनं कुरुत
(२) ग्रन्थोक्तदिशा षड्विधसन्निकर्षं वर्णयत।
(३) ग्रन्थोक्तरीत्या परत्व-अपरत्वयोः उदाहरणपुरस्सरं वर्णनं लिखत

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) त्रिविधकारणं सोदाहरणं स्पष्टयत।
(२) प्रत्यक्षप्रमाणस्य उपरि एकं निबन्धं लिखत।

**प्रश्नः – ११ अधोलिखितयोः एकां टिप्पणीं लिखत।** ०२

(१) स्मृतिः।
(२) सङ्ख्या।

**प्रश्नः – १२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत** ०२

(१) किं नाम संयोगः?
(२) किं नाम कार्यम्?
(३) किं नाम कारणम्?
(४) पटस्य असमवायिकारणम् किम्?

***

`**Answer Key**

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – CE-1.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १२/१२/२०१६ | सन्दर्भग्रन्थः – तर्कसङ्ग्रहः दीपिकासहितः (प्रत्यक्षखण्डान्ता) | |

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १**

**प्रश्नः – २**

**प्रश्नः – ३** १.

**प्रश्नः – ४**
१. बालानाम्
२. नित्यः
३. द्विविधम् । परम् अपरं चेति ।
४. ग्रन्थस्य निर्विघ्नसमाप्तिः
५. षट् । द्रव्यगुणकर्मसामान्यविशेषाभावाः ।
६. अन्नम्भट्टः
७. त्रयः।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५**

**प्रश्नः – ६**

**प्रश्नः – ७** १.

**प्रश्नः – ८**
१. परमाणुरूपः
२. शब्दः
३. मृत्पाषाणादिः
४. वरुणलोके
५. चक्षुः कृष्णताराग्रवर्ति
६. घ्राणम्
७. चतुर्विधः । भौमदिव्योदर्याकरजभेदात् ।

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९**

**प्रश्नः – १०**

**प्रश्नः – ११** १.

**प्रश्नः – १२**
१. संयुक्तव्यवहारहेतु
२. प्रागभावप्रतियोगि
३. कार्यनियतपूर्ववृत्ति कारणम्
४. तन्तुसंयोगः।